# 2. जन्तुशाला

(वरुण: तरुण: अन्ये बालका: च वार्तालापं कुर्वन्ति)

तरुण: – मित्र वरुण! अद्य अहं विद्यालयं न गच्छामि।

वरुण: – किं कारणम्?

तरुण: – मम मातुल: दिल्लीनगरात् आगत: । तेन सह अद्य अहं जन्तुशालाम् गच्छामि। तत्र अनेकान् जन्तून् पश्यामि।

वरुण: – अहम् अपि जनकेन सह बसयानेन आगच्छामि।

तरुण: – जानासि किम्?

वरुणः – जानामि। एषा जन्तुशाला वण्डलूर्-प्रदेशे अस्ति।

तरुणः – वयं सर्वे मित्रैः सह जन्तुशालां गच्छामः ।

अहम् अपि आगच्छामि। वण्डलूर्-प्रदेशः दूरे अस्ति।

(बालाः उच्चैः करतालं वादयन्ति)

(मित्रैः सह तत्र गच्छन्ति, प्रवेशचिटिकां क्रीणन्ति अन्तः प्रविशन्ति च)


तरुणः – तात! कः एषः विशालकायः?

तातः – एषः गण्डकः । भो वरुण! अत्र विविधवर्णान् चटकान् पश्य।

वरुणः – अहो, अतिरमणीयाः !

(अन्यत्र गच्छन्ति)

तरुणः – तात! अत्र जलाशये हंसाः तरन्ति।




तातः – बालाः! हंसः श्वेतवर्णः सुन्दरः च। वयं क्रमेण अन्यान् जन्तून् द्रक्ष्यामः । एषः गण्डकः अतीव बलवान्।

वरुणः – तात! न कोऽपि एनं मारयितुम् समर्थः इति अहं चिन्तयामि।

तातः – अथ किम्? अत्र अयःपञ्जरके सिंहम् न पश्यसि? एषः वनराजः क्षणेन एव गण्डकं गजं वा हन्तुम् समर्थः ।

तरुणः – तात, ये जन्तवः अत्र वसन्ति, तेषां भोजनस्य व्यवस्थां कः करोति?



तातः – तत्र सेवकः भवति। सः भोजनस्य व्यवस्थां करोति तस्य रक्षणं च करोति।

वरुणः – हे तरुण! अत्र केचन वानराः कूर्दन्ति।

तरुणः – अहं वानरेभ्यः फलानि यच्छामि।

वरुणः – तरुण! अत्र पश्य। एषः गजः महाकायः पशुः अस्ति।

तरुणः – आम्! अहं गजम् आरोहामि।
(गजारोहणं करोति)

वरुणः – अत्र शुकाः, बकाः, सारसाः, मयूराः च स्वच्छन्दं विहरन्ति। एतेषु शुकः हरितः सुन्दरः च।

तरुणः – अत्र वयं सिंहशावकान्, सिंहान्, व्याघ्रान्, मकरान्, भल्लूकान् च पश्यामः ।

तातः – शोभनम्। वयं श्रान्ताः स्मः । एकत्र उपविशामः । भोजनात् पश्चात् अन्यान् जन्तून् द्रक्ष्यामः ।

(सर्वे भोजनाय उपविशन्ति।)

# अनुशीलनम्

**1. आम् अथवा न इति लिखत।**

(i) किं जन्तुशाला वण्डलूर-प्रदेशे अस्ति? ☐

(ii) किं वण्डलूर-प्रदेशः दिल्लीनगरे अस्ति? ☐

(iii) किं शुकस्य वर्णः कृष्णः अस्ति? ☐

(iv) किं गजः स्थूलः अस्ति? ☐

(v) किं हंसः पीतवर्णः अस्ति? ☐

**2. अधोलिखितानां प्रश्नानाम् उत्तरं एकेन/पदेन लिखत।**

(i) जन्तुशाला कुत्र अस्ति?

(ii) कः दिल्लीनगरात् आगच्छत्?

(iii) त्वम् केन सह आगच्छः?

(iv) तरुणः वानरेभ्यः किं यच्छति?

(v) शुकस्य वर्णः कः?

**3. एकेन वाक्येन उत्तरत।**

(i) तरुणः केन सह जन्तुशालाम् अगच्छत्?

(ii) गजम् कः आरोहति?

(iii) हंसस्य वर्णः कः?

(iv) पञ्जरे कः तिष्ठति?

(v) गण्डकः कुत्र अस्ति?

### 4. उचितपदैः रिक्तस्थानानि पूरयत।

(जनकेन, वानराय, सिंहशावकान्, गण्डकः, शुकः)

(i) अहं --------- फलानि अयच्छम्।

(ii) --------- अतीव स्थूलः पशुः अस्ति।

(iii) अहं --------- सह जन्तुशालाम् अगच्छम्।

(iv) वयं --------- मकरान्, गण्डकान् च अपश्याम।

(v) --------- हरितवर्णः अस्ति।

### 5. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत।

(i) अहं <u>वानराय</u> फलम् अयच्छम्।

(ii) <u>गण्डकः</u> बलवान् पशुः अस्ति।

(iii) अहं <u>भल्लूकान्</u> अपश्यम्।

(iv) <u>जन्तुशाला</u> वण्डलूर्-प्रदेशे अस्ति।

### 6. विपरीतार्थक-पदानां मेलनं कुरुत।

| | क | ख |
|---|---|---|
| (i) | स्थूलः | असुन्दरम् |
| (ii) | सुन्दरम् | सूक्ष्मः |
| (iii) | मित्रम् | निकटम् |
| (iv) | दूरम् | शत्रुः |

**7. पाठात् अव्ययपदानि चित्वा लिखत।**

यथा – अपि

**8. मञ्जूषायां प्रदत्तेषु पशुषु कः ग्राम्यः, कः वन्यः इति लिखत।**

| |
|---|
| वानरः, वृषभः, गजः, बिडालः, कुक्कुरः, अजः, सिंहः, भल्लूकः, चित्रकः, धेनुः, शृगालः, व्याघ्रः, घोटकः, गण्डकः |

| ग्राम्यः | वन्यः |
|---|---|
| (i) | (i) |
| (ii) | (ii) |
| (iii) | (iii) |
| (iv) | (iv) |
| (v) | (v) |
| (vi) | (vi) |
| (vii) | (vii) |